कृष्णचर्म्मन्यगास्यैव तस्योपरि च धारयेत् ॥
कुम्भन्तु नवनीतस्य प्रस्थमात्रस्य धारयेत् ।
चतुःसं चतुर्थभागस्य तस्या उत्तरतो न्यसेत् ॥
कृत्वा विधानेन च राजसिंह-
सुवर्णशृङ्गी सुमुखी च कार्य्या ।
नेत्रे च तस्या मणिमौक्तिकैस्तु
कृत्वा तथान्यच्च गुड़ेन जिह्वाम् ॥
ओष्ठौ च पुष्पैश्च फलैश्च दन्ता:
प्रकल्प्य सास्नाश्च सितैश्च सूत्रै: ॥
नवनीतस्तनीं राजन्निक्षुपादां प्रकल्पयेत् ।
ताम्रपृष्ठीं कांस्यदोहां दर्भरोमकृतच्छवीम् ॥
स्वर्णशृङ्गीं रौप्यखुराम् पञ्चरत्नसमन्विताम् ।
चतुर्भिस्तिलपात्रैस्तु संयुतां सर्व्वतो दिश: ॥
आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैरलङ्कृताम् ।
दिक्षु दीपांश्च प्रज्वाल्य ब्राह्मणाय निवेदयेत् ॥
वेदवेदाङ्गविदुषे आहिताग्निर्ज्जितात्मवान् ।
मन्त्रास्त एव जप्तव्या: सर्व्वधेनुषु ये स्मृता: ॥
पुरा देवासुरै: सर्व्वै: सागरस्य तु मन्थने
उत्पन्नं दिव्यमन्त्रसं नवनीतमिदं शुभम् ॥
आप्यायनश्च भूतानां नवनीत ! नमोऽस्तु ते ।
एवमुच्चार्य्य तां दद्यात् ब्राह्मणाय कुटुम्बिने ॥
धेनुञ्च दत्त्वा सुसुदां सोपधानां
नयेद्गृहं विप्रवर्य्यस्य भूय: ।
हविष्यमेव सरसञ्चोपभुक्त्वा
तिष्ठेद्दिनं धेनुदस्त्रीणि विप्र: ॥
य: प्रपश्यति तां धेनुं दीयमानां नरोत्तम ।
सर्व्वपापविनिर्म्मुक्त: शिवसायुज्यतां व्रजेत् ॥
पितृभि: पूर्व्वजै: सार्द्धं भविष्यद्भिश्च मानव: ।
विष्णुलोकं व्रजत्याशु यावदाभूतसंप्लवम् ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानव: ।
सर्व्वपापविशुद्धात्मा विष्णुलोके महीयते ॥"
इति वराहपुराणम् ॥

नवपाठक:, पुं, (नवो नूतन: पाठकोऽध्यापक: ।) नूतनाध्यापक: । इति सिद्धान्तकौमुदी ॥

नवफलिका, स्त्री, ( नवं फलं यस्या: । कापि अत इत्वम् । ) नयम् । नवजातरजोऽङ्गना । इति मेदिनी । के, २३० ॥

नवम:, त्रि, ( नवन्+"तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । ततो "नान्तादसंख्यादेर्म्मट् ।" ५ । २ । ४९ । इति डटो मट् । ) नवानां पूरण: । इति व्याकरणम् ॥ नयइ इत्यादि भाषा ॥

नवमल्लिका, स्त्री, ( नवा नूतना स्तुत्या वा मल्लिका । ) नवमालिका । इति शब्दरत्नावली ॥ ( यथा, प्रबोधचन्द्रोदये । १ । १२ ।
"रम्यं हर्म्म्यतलं नवा: सुनयना गुञ्जद्द्विरेफा लता: ।
प्रोन्मीलन्नवमल्लिका: सुरभयो वाता: सचन्द्रा निशा: ॥" )

नवमालिका, स्त्री, (नवा नूतना मालिका मल्लिकापुष्पम् । ) नवमल्लिकापुष्पम् । वासन्ती नेवारी इति लोके । नेयालि इति नेओयार इति च भाषा । तत्पर्य्याय: । अतिमोदा २ शैव्नी ३ शीतोद्भवा ४ सप्तला ५ सुकुमारी ६ सुरभि: ७ शुचिमल्लिका ८ सुगन्धा ९ शिखरिणी १० नवाली ११ । इति राजनिर्घण्ट: ॥ भद्रवर्म्मा १२ देवलता १३ । इति शब्दचन्द्रिका ॥ गन्धनिलया १४ मालिका १५ नवमल्लिका १६ । इति शब्दरत्नावली ॥ तस्या गुणा: । अतिशैत्यत्वम् । सुरभित्वम् । सर्व्वरोगहरत्वञ्च । इति राजनिर्घण्ट: ॥ तन्नामगुणा: ।
"नेपाली कथिता तज्ज्ञै: सप्तला नवमालिका ।
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापजित् ॥"
इति भावप्रकाश: ॥

नवमी, स्त्री, ( नवम+टित्त्वात् ङीप् । ) तिथिविशेष: । सा चन्द्रस्य नवमकलाक्रियारूपा । शुक्लपक्षे ९ कृष्णपक्षे २४ पञ्जिकाकारसङ्केतेन एतदङ्कबोधिता ॥ अथ नवमीव्यवस्था । "सा चाष्टमीयुता ग्राह्या युग्मात् । भविष्ये ।
'मासैश्चतुर्भिर्यत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर नवम्यां कार्त्तिकस्य च ॥'
तथा भविष्ये ।
'माघे मासि तु या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी नृणाम् ॥
स्नानं दानं जपो होमो देवार्च्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरै: ॥'
तथा कालिकापुराणम् ।
'नवम्यां नववर्षाणि राजन् ! पिष्टाशनो भवेत् ।
तस्य तुष्टा भवेद्गौरी सर्व्वकामप्रदा शुभा ॥'
अदोत्यादि नवम्यान्तिथावारभ्य नव वर्षाणि यावत् प्रतिशुक्लनवम्यां पिष्टेतरभोजननिवृत्तिव्रतमिति सङ्कल्पे विशेष: । सर्व्वकामप्रदगौरीतोष: फलम् ।" इति तिथितत्त्वम् ॥ श्रीरामनवमीव्यवस्था तच्छब्दे द्रष्टव्या ॥*॥ इयं दुर्गातिथि: । तत्र तस्या: पूजा कर्त्तव्या । यथा,—
ब्रह्मोवाच ।
"इयं देवी वरारोहा यातु शैलं हिमाचलम् ।
तत्र यूयं सुरा: सर्व्वे गत्वा नन्दत माचिरम् ॥
नवम्याञ्च सदा पूज्या इयं देवी समाधिना ।
वरदा सर्व्वलोकानां भविष्यति न संशय: ॥
नवम्यां यश्च पिष्टाशी भविष्यति हि मानव: ।
नारी वा तस्य सम्पन्नं भविष्यति मनोगतम् ॥"
इति वराहपुराणम् ॥
कार्त्तिकशुक्लनवम्यां जगद्धात्रीपूजाप्रमाणानि यथा,—
"प्रपूजयेज्जगद्धात्रीं कार्त्तिके शुक्लपक्षके ।
दिनोदये च मध्याह्ने सायाह्ने नवमेऽहनि ॥"
इति मायातन्त्रे १७ पटल: ॥
"कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उपस्यहोदितो भानुर्दुर्गामाराध्य यत्नवान् ॥
पुत्त्रारोग्यधनं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुज: शनिभौमदिने यदि ।
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ॥"
इति कात्यायनीतन्त्रे ७८ पटल: ॥
"कार्त्तिके शुक्लपक्षे तु त्रेताया: प्रथमेऽहनि ।
त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्पत्प्रवृद्धये ॥"
इत्युत्तरकामाख्यातन्त्रे ११ पटल: ॥
अथ नवमीजातफलम् । यथा, कोष्ठीप्रदीपे ।
"विरोधकर्त्ता सुजनैरगम्य:
परापकारार्थमति: कुशील: ।
आचारहीन: कृपण: कठोर,
प्रसूतिकाले नवमी यदि स्यात् ॥"

नवयौवना, स्त्री, ( नवं यौवनं यस्या: । ) युवती । तत्पर्य्याय: । दिक्करी २ । इति हारावली । १५४ ॥ तालुनी ३ कुहेली ४ । इति शब्दमाला ॥

नवरङ्गं, क्ली, ( नव रङ्गा यस्मात् । ) कायस्थमुख्यकुलीनानां पञ्चदानचतुर्ग्रहणात्मककुलविशेष: । तद्यथा,—
"समाने प्रथमं दानं द्वितीयञ्च कनिष्ठके
षड्भ्रातरि तृतीयञ्च मध्यश्रेष्ठे चतुर्थकम् ॥
तेजोजे पञ्चमं दानं कुर्य्यादेतद्विधानत: ।
ग्रहणं जन्मनि समे कनिष्ठे च द्वितीयकम् ॥
तृतीयं जन्ममध्यांशे तेजोजेऽपि चतुर्थकम् ।
नवरङ्गमिति प्रोक्तं मुख्यानां हि महागुणम् ॥"
इति कुलाचार्य्यकारिका ॥

नवरत्नं, क्ली, ( नवानां रत्नानां समाहार: । ) नवप्रकारमणय: । तद्यथा,—
"मुक्तामाणिक्यवैदूर्य्यगोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥"
इति तन्त्रसार: ॥
( यथा च,—
"वज्रञ्च मौक्तिकञ्चैव माणिक्यं नीलमेव च ।
तथा मरकतं ज्ञेयं महारत्नानि पञ्चधा ॥
गोमेद: पद्मरागश्च वैदूर्य्यञ्च प्रवालकम् ।
चत्वारि उपरत्नानि नवरत्नमिदं स्मृतम् ॥"
"रत्नं गारुत्मतं पुष्पं रागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ॥
रत्नं हीरा । गारुत्मतं पान्ना । माणिक्यं पद्मराग: । इन्द्रनील: नीला ।" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ ) नवग्रहदोषशान्त्यै धार्य्याणि नव रत्नानि यथा,—
"वैदूर्य्यं धारयेत् सूर्य्ये नीलञ्च मृगलाञ्छने ।
आवनेयेऽपि माणिक्यं पद्मरागं शशाङ्कजे ॥
गुरौ मुक्तां भृगौ वज्रं शनौ नीलं विदुर्बुधा: ।
राहौ गोमेदकं धार्य्यं केतौ मरकतन्तथा ॥"
इति दीपिका ॥
विक्रमादित्यराजसभास्थनवसंख्यकपण्डिता: । यथा,—
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासा: ।
ख्यातो वराहमिहिरो नृपते: सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥"
इति नवरत्नम् ॥
नव श्लोका: । यथा,—
"मित्रमर्षौ तथा गीतिर्धर्म्मकार्पण्यमर्षका: ।